Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४६५२

Title नारदीयपुराणे कोकिलाव्रतोद्यापनम्

Author ×

Extent १२ पत्राणि Age सं. १९०६

Subject पुराण माहात्म्यादि

© Dharmartha Trust J&K. Digitized by eGangotri

कोकिलाव्रतोद्यापनं नारदीयपुराणे

षद्‌पर

© Dharmartha Trust J&K. Digitized by eGangotri

व्रतार्के

त्रि। शिवशंकरत्रि। जयशंकरस्येदम् क्रोद्रि। लाव्रतम्।

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीगणेशाय नमः। अथ कोकिलाव्रतं। अथापरमाषाढाधिमासे गुर्जेराचारमा
संकोकिलाव्रतं। युधिष्ठिर उवाच। स्वभर्त्रा सह संयोगः स्नेहसौभाग्यमेव च।
नवेधव्याकुलस्त्रीणां तद्व्रतं ब्रूहि केशव। श्रीकृष्ण उवाच। यमुनायास्तटे रम्ये
मथुरानगरी शुभा। तस्यां शत्रुघ्ननामाभूद्राजा राघवनंदनः। तस्य भार्या की
र्तिमाला नाम्नासीत्पतिता भुवि। आगम्य भगवान् दृष्टो वसिष्ठो मुनिसत्त
मः। कीर्तिमालोवाच। वदस्वैतत्वं मुनिश्रेष्ठ सौभाग्यप्राप्तिदं व्रतं। पूज्यः कथं
च भगवान् शिवः केन व्रतेन च। वसिष्ठ उवाच॥ यदिष्टं पृच्छसि मे त्वं हि व्रता ॥१॥
नामुत्तमं व्रतं। तारणं सर्वपापानां कथयामि निबोध तत्। दक्षप्रजापतेर्य

© Dharmartha Trust J&K. Digitized by eGangotri

ते पुरा देवाः समागताः । ऋषयश्च तथा सर्वे विद्याधरगणास्तथा । ब्रह्मा
विष्णुश्च वायुश्च देवराजस्तथैव च । वरुणोऽग्निर्ग्रहाः सर्वे ये चान्ये च दिवौ
कसः । वसिष्ठो वाल्मिकिर्गार्ग्यो विश्वामित्रो महानृषिः । एते चान्ये च ऋ
षयः सर्वे यत्रापि समागताः । अपश्यन्नारदस्तत्र संति येत्रागता इति । ईश्वरे
ण विना सम्यक् दृष्ट्वा सर्वान् समागतान् । शिरस्वां संस्पृश्य पाणिभ्यां ननर्त्त क
लहप्रियः । ज्ञात्वा कलहमूलं च ततः कैलासमाययौ । सर्वविघ्ननाशनं स्थानं
कैलासशिखरं मुने । तत्र दृष्ट्वा समासीनं गौरीसहितशंकरं । कृताञ्जलिपु
टो भूत्वा प्रणिपत्य मुनिः स्थितः । ईश्वरस्तमुवाचाथ निःश्वसंतमनेकधा । दि

© Dharmartha Trust J&K. Digitized by eGangotri

मागमनं कृत्वां तेन महीयं सदनं प्रति। श्वासोच्छ्वासेन संयुक्तः स्तत्र मे ब्रूहि द्विजो
त्तमाः ईश्वरस्य वचः श्रुत्वा शिरवां संस्पृश्य पाणिना। दुःखयुक्त इवोवाच
नारदः कलहप्रियः। नारद उवाच॥ यन्निमित्तं महादेव मर्त्यलोकात्समाग
तः। त्वदंतिकं दुःखयुक्तः स्तच्छृणु च जगत्पते॥ दक्षयज्ञ महं द्रष्टुमद्य चैवास्
मागतः। तत्र यज्ञे स्थिताः सर्वे देवा ज्ञानात्तरप्रजो। दृष्टा स्त्वं वनं तेन मध्ये दृष्ट
स्त्रिं तुवने श्वरः। तवायज्ञाभूतातेन दक्षेणपुण्यकर्मणा॥ तेन निःश्वास
संयुक्त आगतोस्मि त्वदंतिकं॥ ईश्वरेण विनाकिं चित् धर्मकार्यं न सिध्य
ति। अतोस्य विफलाः सर्वः प्रयासाः स्वमखं प्रति। तस्य तज्ञाषितं श्रुत्वा न ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

तन्मिथ्येति चिंतयत्।सक्रोधस्तु तदा जात ईश्वरो जगदीश्वरः।गौर्याच
प्रार्थितो देवः कृत्वा तन्नारदेरितं।तस्य यज्ञस्य घाताय देवदेव व्रजाम्यहं।इ
त्युक्त्वा चलिता रोषाद् ईश्वरेण निवारिता।जगदीशान मत्तुल्यं व्रजामि पि
तृवेश्मनी।नारदेनाथ सहिता गणेशेनाथ संयुता।यज्ञार्थमागता चैव द
क्षगेहे शिवप्रिया।दक्षो दृष्ट्वा वसोर्धारां लज्जिता च शिवप्रिया।तिष्ठंति
द्वारितां दक्षो न ददर्श महासती।।क्षणमेकं च तिष्ठंति यदा दक्षो न पश्यति
तदैव चिंतितं गौर्या जीवितव्यं मया कथं।धाविता कुंडनिकटे हाहा कृत्वा च
सा ततः।क्षिप्तं दक्षो न हा गौर्या शापं दत्वा सुदारुणं।दृष्ट्वा तत्र गणेशेन पा
© Dharmartha Trust J&K. Digitized by eGangotri

३

3

धः परमुरुघतः। स्कन्दोऽह्य सोतसत्यर्थं गौर्याश्चापि गणाधिपः। पाशेनवध्वा
कृतिविक्लोपान्निहतवान्सुरान्। दद्रोणानोदिता देवाः सर्वे युध्याय निर्ययुः।
महयुधमनन्तत्र सहदेवैर्गणेश्चितुः। तं दृष्ट्वा नारदः शीघ्रं पुनः कैलासमा
ययौ। निवेदयामास च तमुदंतं सर्वमीश्वरां। तच्छ्रुत्वा स्फालयामास जटां ब्रो
पादुमापतिः। ततो जातो ति विकटः पुरुषो रक्तलोचनः। स बभाषे महादेवं स्वा
मिन्नाज्ञां च देहि मे। वीरभद्रेति नामास्य दत्त्वा चाज्ञां समर्पयत्। दक्षयज्ञवि
घातार्थं गच्छ वीराशु ति सत्वरं। कृत्वा तदीश्वरं वचः सर्वभ्रमपसंवृतः। प्राययौ
यज्ञसदनमस्तं गवहिष्ठु निरूपन्। ततरिंद्रादयो देवास्तद्धाय विनिर्ययुः। द्र

© Dharmartha Trust J&K. Digitized by eGangotri

गणत्सराजिनास्तेन विद्रुतास्च दिशो दश। अनुधुतश्च तान् सोपि पूष्णो दंतानपात
यत्। भगस्य नेत्रे नाशाच सरस्वत्या नसं तत। एवं विद्राव्य तान् सर्वान् शिरो दक्षस्य
चिछिदो हृत्वैवयज्ञघातं स आजगाम शिवांतिकं। नमस्कृत्य पुरस्तस्थौ कृतं
कार्यमिति ब्रुवन्। तथाप्यशांतकोपोस्य ज्ञात्वेति तेन चक्षुषा। प्रसादयितु
मीशानं ब्रह्मविष्णू समीयतुः। नमस्कृत्य स्तुतैस्ताभ्यां प्रसन्नो न स शिवः। ना
रदस्तुंबरश्चैव गानैः शिवमतोषयत्। प्रसंनं वीक्ष्य तं विप्र शिवं संस्पृश्य पाणि
ना। नर्तनैर्नारदस्तत्र तोषयन्न धिवं शिवं। एतस्मिन्नंतरे ब्रह्मा विष्णुश्च प्रमथा
धिपं। व्यजिज्ञपत्तं दक्षादीन् रूपाद्धृष्या विज्ञोवृया कृतांगान् कुरु पूर्णांगान् मता

© Dharmartha Trust J&K. Digitized by eGangotri

संजीवयप्रभो। विलोकितास्तेदेवेनकृपादृष्ट्या। विलोकिताः। पूषाद्यमरदा
स्यत्रअनुकंपत्वप्रसादनः। उत्थितःपादयोर्मूलंपपातदक्षःपिनाकिनः। अपराधं
क्षमस्वेतिपुनःपुनरुवाचह। उत्थापितश्चरेणसोदक्षःपिनाकपाणिना। उक्त
श्चमापुनःकार्षीरेवमीशावमाननं। विचरस्वसुखेनेतिसत्यस्तंकोपपन्न। विश
तांशशापचतदागौरीयज्ञविघ्नकरीशिवः। मखेविघ्नंकृतवतीदक्षस्येषातत
श्चिरात्। तिर्यग्योनिसमापन्नाविचरिष्यतिभूतले। ततोगौरीवचाषेनं। प्राणि
पत्यसदाशिवं। कथंयास्यामितिर्यक्त्वंभूतलेवसिष्यतिःकथं। अन्यथावचनंच
विताशापएवस्त्वयोदितः। कोकिलामधुरालापाभवेयंनंदनेयतः। कोकिला

॥४॥८

© Dharmartha Trust J&K. Digitized by eGangotri

नां स्वरो रूपं नारी रूपं पतिव्रता। विद्या रूपं कुरूपाणां क्षमा रूपं तपस्विनी।
अविराद्देव च पुनः कुले महति जन्म नि प्रियास्त्वमेव नर्मोचन वियोगस्य मे
यतः। वरयेत् कुलजां प्राज्ञः कुरूपामपि कन्यकां। दुःकुले च समुत्पन्ना नर्तुः पात
यते कुलं॥ नदी पातयते कूलं नारी पातयते कुलं। नदीनां चैव नारीणां स्वच्छं
दललिता गतिः। ततस्त्वं शुभे महादेव श्वके शापविमोचनी। दशवर्षसहस्रा
णि क्रोष्टिला रूपधारिणी। नंदने देवविपिने चरिष्यति ततः परं। हिमाचल
सुतां कृत्वा मल्लियात्वमुपेष्यसि। देवानां तु यथा विष्णुः सहकारो महीरुहां।
गंगा च सर्वतीर्थानां तथा तिर्यक्षु कोकिला। आपाणौ द्वोपदस्यातां क्रोष्टिला

© Dharmartha Trust J&K. Digitized by eGangotri

यास्तृतीयांवर्तनी। नस्याकुरुते नारी न सा वैधव्यमाप्नुयात्॥ वसिष्ठ उवाच॥
एतद्वाक्यावसाने तु गौरी साकोकिला भवेत्। ततः आदिष्टु विहिते प्रवितं
कोकिलाव्रतं। यानारी नैव कुरुते मोहात्सा विधवा भवेत्। कुरु त्वमेतत्कल्या
णि द्विजिह्वे मालेव्रतोत्तमं। कान्तिमालोवाच॥ कथमाराध्यते गौरी कोकिला
रूपधारिणी। विधानं ब्रूहि तद्दिव्यं त्वत्प्रसादात्करोम्यहं॥ वसिष्ठ उवाच।
कोकिलाव्रतमहात्म्यं विधानं च वदामि ते। यद्देवी प्रयत्नेन मंत्रैः पौरा
णिकैर्युतं। मलमासे व्यतिक्रांते शुभे आषाढे समागते। आषाढ्यां पौर्णमा
स्यां तु संध्याकाले ह्युपस्थिते। संकल्पयेन्मासमेकं श्रावणे प्रच्चतिद्यहं। स्ना

© Dharmartha Trust J&K. Digitized by eGangotri

नंकरिष्येनित्यंचब्रह्मचर्येस्थिता(ते)स्मि।भोक्ष्येनक्तंचभूशय्यांकरिष्येप्राणिनांद
यां।सौभाग्यधनधान्यादिप्राप्तयेशिवतुष्टये।इतिसंकल्प्यविप्राग्नेनारीविप्रे
भ्यएवच।प्राप्यानुज्ञांतुसंवाद्यसामग्रींसकलामपि।प्रत्यूषेचप्रतिदिनंदंत
धावनपूर्वकं।नद्यांगत्वाथवावाप्यांतडागेगिरिनिर्झरे।स्नानंकरोमिदेवे
शिकोविलेप्यनयेतव।जलेस्मिन्पावनेपुण्येसर्वदेवजलाश्रये।स्नानंकु
र्याद्व्रतीदेवीसुगंधामलकैस्तिलैः।दिनाष्टकंततःपश्चात्सर्वौषध्यापुनः
पुष्पकं।वचापिष्टेनचस्नानंदिनान्यष्टौसमाचरेत्।तिलामलकपिष्टेन
वचौषधियुतेनवा।षट्दिनानिततःस्नानंसंपूर्णंफललिप्सया।स्नात्वा

© Dharmartha Trust J&K. Digitized by eGangotri

ध्यात्वा रविं तस्मै द..पाद्यर्घ्यं प्रयत्नतः। आदित्य भास्कर रवे ह्यर्क सूर्य दिवाक
र प्रभाकर नमस्कृत्यं गृहाणार्घ्यं नमोस्तुते। सूर्यार्घ्यमंत्रः। कारयेत्कोकिलां
देवीं सौवर्णां सर्वकामदां। रौप्यं चरणौ याम्यैव नेत्रयोश्चापि मौक्तिकं। र
त्नानि पंच पृष्ठे तु चूतवृक्ष समाश्रिता। अथवा तिलपिष्टेन कोकिलां पक्षि
रूपिणीं। निधाय ताम्रपात्रे तां पूजयेत्तु समाहितः। उपचारैः षोडशभिर्य
थावत्तन्निबोध मे॥ आवाहयामि तां देवीं कोकिलारूपधारिणीं। अव
तारं कुरु धात्र प्रसादं कुरु सुव्रते॥ आवाहनं। आगच्छ कोकिले देवी देहि
मे कोकिल वांछितं। चूतवृक्षं समारुह्य रमस्वेनं दिने वने। आसनं॥ तिर्य

॥६॥

6

© Dharmartha Trust J&K. Digitized by eGangotri

ज्योनिसमुद्भूते कोकिले कलकंठके। तिलपुष्पाद्दते रर्घ्यं गृहाणत्वं नमोस्तु

ते॥ अर्घ्यं॥ आषाढस्यासिते पक्षे मे च वर्णस्वरूपिणी॥ कोकिलेना

मत्वं देवी स्नानार्थं प्रतिगृह्यतां॥ स्नानं॥ कोकिले कलकंठे च माधवेम

धुरस्वरे। वसंते वससे देवी वस्त्रं च प्रतिगृह्यतां॥ वस्त्रं॥ श्रीखंडं चंदनं दि

व्यं गंधाढ्यं सुमनोहरं॥ विलेपनं मया दत्तं प्रीत्यर्थं प्रतिगृह्यतां॥ गंधं॥ हरि

द्राकुंकुमद्रव्यैः कोकिले कामसंभवे। कुंकुमेनार्चिता सित्वमतः शांतिं प्रयच्छ

मे॥ हरिद्रा॥ कृष्णं शुक्लं च रक्तं च वासांसि विविधानि च। पीनस्तनप्रदानेन मा

तास्तुः सर्वदेवताः॥ वस्त्रयुग्मं॥ माल्यादीनि तिपुष्पं॥ वनस्पत्युद्भव इति

धूपं॥ आज्यं च वर्त्तिसंयुक्तमिति दीपं॥ सर्वभक्ष्यसमायुक्तैः रसैः सर्वैः समन्वि
तं॥ सर्वदेवसमाहारं नैवेद्यं प्रतिगृह्यतां॥ इति नैवेद्यं॥ कूष्मांडैर्नालिकेरैश्च
खर्जूरैर्दाडिमीफलैः॥ चूतजंबीरजंबूश्रीफलैरामलकैस्तथा॥ द्राक्षानारिं
गबदरैर्मातुलिंगैः सशर्करैः॥ फलानि॥ नागवल्लीदलमिति॥ तांबूलं॥
हिरण्येनि दक्षिणा॥ प्रार्थना॥ नित्यानि कंठसूत्राणि दद्याद्यापि दिने दि
ने॥ कुंकुमं पुष्पतांबूलमक्षताश्च दिने दिने॥ कुर्याद्देवीविधौ पूजा श्रावणे
तं च सुव्रते॥ विसर्जयेच्च पश्चात्तां सौवर्णां कोकिलां यदि॥ यदा तु तिल
पिष्टस्य कोकिला क्रियते तदा॥ कुर्यान्नित्यं हमा कान्तं नित्यायास्तु विस

© Dharmartha Trust J&K. Digitized by eGangotri

जैनी। रम्यं वने समागत्य कृत्वा कोकिलकूजितं। यदा न श्रूयते शब्द
मुपवासं नु तद्दिने। कोकिले कृष्णवर्णे च सदा वासो वनेषु ते। सौभा
ग्यमतुलं देहि गृहाण गंधं नमोस्तु ते। विसर्जनमंत्रः॥ चैत्ररथवनोत्पन्ने
विंध्यपर्वतवासिनी। गछ गछ महादुर्गे स्वस्थाने नंदने वने। विसर्ज
नं॥ रूपं देहि धनं देहि सर्वसौख्यं च देहि मे। पुत्रान्देहि यशो देहि सौभाग्यं दे
हि संपदः। इत्युक्त्वा च ततः पश्चाद्विधानेन सुव्रती। नक्तंभोजी भवेत्पार्थ
यावन्मासः समाप्यते। मासांते ताम्रपात्रे तु कोकिलां स्वर्णनिर्मितां। वस्त्र
धान्यगुडैर्युक्तां श्रावण्यां कुंडलं तथा। दद्यात्सदक्षिणां चापि दैवज्ञे वा पुरोहि

© Dharmartha Trust J&K. Digitized by eGangotri

8

ते॥ एवमाषाढमासस्य द्वैविध्ये समुपस्थिते। सधवा विधवा वापि या नारी कोकि-
लाव्रतं। करोति सप्तजन्मानि सौभाग्यं लभते तु सा॥ मृता गौरीपुरीं याति विमा-
नेनार्कतेजसा॥ भगवानुवाच॥ एतद्व्रतं वसिष्ठेन मुनिना कथितं पुरा। तथा
कृतं तु तत्सार्पसमस्तं कौन्तिमालया। तस्याश्च सर्वं निष्पन्नं वसिष्ठवचनेय-
या। एवं यान्यापि कौन्तेय कोकिलाव्रतमुत्तमं। करिष्यति ततस्तस्याः सौभा-
ग्यं च भविष्यति। आषाढ्यां द्रौपदास्या तां कोकिलाव्रतमाचरेत्॥ न करोति
यदा नारी व्याला भवति कानने। एकतः सर्वदानानि कोकिलाव्रतमेकतः॥
कृतं पुराप्सरोभिश्च ऋषिपत्नीभिरादरात्॥ अहल्यया च सा स्नात्वा त्र

© Dharmartha Trust J&K. Digitized by eGangotri

र्चिता॥ पापमुक्तये। अरुंधत्या सह स्नात्वा पूजिता कोकिला नृप। सीतया पूजि
ता सा वै सर्वकामार्थसिद्धये॥ गौतम्यां दंडकारण्ये स्नानं कृत्वा यथाविधि।
नलान्वेषणकामाय दमयंत्या च पूजिता॥ रुक्मिण्या च ततः स्नात्वा पूजिता
कोकिला शिवा। विष्णोः पत्युरवाप्त्यर्थं तच्च जातं न संशयः। कुबेरनामजिना
हीना परदुर्मरता तथा। एवं वंध्या काकवंध्या विवत्सा मृतवत्सका। सर्वास्ताः फ
लनाजस्युर्व्रतस्यास्य प्रभावतः॥ आयुरारोग्यमैश्वर्यं सुखं वृद्धिर्यशः प्रजाः।
सौभाग्यं सुंदरं रूपं नारी प्राप्नोति नान्यथा। एतद्व्रतं मया ख्यातं कार्यं वारत्रयं
नृप। तृतीयांते च विधिवत्कार्यमुद्यापनं शुभं। एकस्माज्जायते द्रव्यं द्वितीया

© Dharmartha Trust J&K. Digitized by eGangotri

६

१

ऽनंतसुतान्। तृतीयाव्रतेपि सौभाग्यंप्राप्नुयान्नात्रसंशयः।। इतिवाराहेकौ
किलाव्रतं।। अथोद्यापनं।। उद्यापनविधिंब्रूहिव्रतस्यास्यममप्रभो। येनावि
ज्ञानमात्रेण सौभाग्यंचभविष्यति।। श्रावण्यांपौर्णमास्यांतुशुक्लपक्षे
विशेषतः। द्वितीयायामेकभक्तंदंतधावनपूर्वकं। उपवासस्यनियमंक
र्तुंव्रतपरायणं। तृतीयापुंण्यफलदामध्याह्नेसमुपोषिता। श्रावणेशु
क्लद्वितीयायामेकभक्तंकृत्वातृतीयामुपोषयेदिति। पौर्णमासीकाला
कालांतरं।। उपलिप्यशुचौदेशेमंडलंतत्रकारयेत्। अष्टदलंलिखेत्स
र्वचतुष्कोणंचचतुर्द्वारं। कलशीवारिपूर्णंचपंचरत्नसमन्वितं। तस्योपरि

।।६।।

© Dharmartha Trust J&K. Digitized by eGangotri

न्यसेत्पात्रं सर्पिषं धेनुविंशतिः। सप्तधान्यन्नतीपात्रं प्रस्थेनैकेन पूरयेत्। त
दन्नावेतदर्धं वा कुडवेनाथ नारद। कुलपिष्टं ह्यलवर्णं युग्मं दद्याद्यथाशक्तितः।
तस्योपरि न्यसेद्देवीं कोकिलां पूर्ववन्नरः। अत्र गंधप्रदानेन धूपदीपप्र
दानकं। नैवेद्यं मोदकाद्यं च पक्वान्नं सघृतं बहु। अर्घ्यं चैव प्रदातव्यं तांबूलं
फलमुत्तमं। रात्रौ जागरणं कार्यं वाद्यनृत्यप्रनृत्तितं। पूजिता एकचित्तेन फ
लं प्राप्नोति वाञ्छितं। प्रभाते विमले जाते स्नानं कृत्वा विधानतः। पूजयेद्वि
धिवद्देवीं होमं च विधिवद्द्विजः। तिलैश्च पद्मपुष्पैश्च तंडुलैर्घृतपायसैः। अ
ष्टोत्तरशतं कृत्वा दुर्गामंत्रेण वैदिकैः। कोकिलाप्रीतये ब्रह्मन् व्याहृतीनां श
तत्रयं। ब्राह्मणान्भोजयेत्पश्चात्सपत्नीकांश्च पंच च। अशक्तो ह्येकयुग्मं च

© Dharmartha Trust J&K. Digitized by eGangotri

10

भोजयेच्चतथा गुरुं ॥ त्रिंशिकीस्यश्च प्रदानव्याकारिका पंचमेव च । मोदकाश्च ससू
त्राश्च वंशपात्रसमन्विता ॥ हृत्स्वर्णसमायुक्ता पक्वान्नं च प्रपूरयेत् । सर्वो
पस्करसंयुक्तं स्त्रिः स्त्रीस्यश्च प्रदापयेत् । आचार्यं पूजयेद्भक्त्या गां सवृत्सां
च सवत्सकां ॥ उपानहौ तथा शय्यां चामरं छत्रमेव च ॥ मुद्रिका कर्णवेष्टौ च
चंदनं कुसुमानि च । सर्वं दद्याद्द्विजे ह्यायसपत्नीकाय नारद । दापयेद्विधि
वत्सर्वं ब्राह्मणाय कुटुंबिने । व्रतोपदिष्टे दानं च भोजनं च सदक्षिणां । एवं
या कुरुते राजन् कोकिलाव्रतमुत्तमं । सर्वं प्राप्नोति सौभाग्यं पुत्रधान्य
धनानि च ॥ ततो भुंजीत नैवेद्यं पुत्रपौत्रैः समन्वितः । कोकिले पूजिता
गच्छ विधिवत्सर्वं ब्रामदे । धारयेत्कोकिलां देवीं सौवर्णां सर्वकामदां । दोप्यौ

© Dharmartha Trust J&K. Digitized by eGangotri

चरणेवं चतुर्भ्नीरचितानेत्रमौक्तिका। पंचरत्नानि पृष्ठेच कृतकृत्यसमा
श्रिता। एवं तं च यथा पूज्या पयोक्ता वशनैः शनैः। विप्रेवृ रार्पिता तत
स्मोः सत्यनावमिदंस्पृत्स्तु। महाकममवाप्नोति महामायाप्रसादतः
इति नारदीये कोकिलाव्रतोद्यापनं समाप्तं॥ संवत् १८०६ नाम प्रथम
नाम्न्यब्दे शुध ५ सोमे लिखितं॥ काश्यां श्री। कल्याण श्री। गणेशवर्धन
श्री। गदाधर श्री। सवितादत्तस्येदं पुस्तकं॥

© Dharmartha Trust J&K. Digitized by eGangotri

२६

१५०

॥११॥

© Dharmartha Trust J&K. Digitized by eGangotri